M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 945

Title Durgastuti Satika

995

C		Durgastuti Saṭika	: Title
:	:	Mahesvara	: Author
:	:		: Editor
:	:		: Year, Vols.
SK :	:		: Publisher
995 :	:		: Remarks

श्रीदुर्गा जीवनं देहि मे शिवे

श्रीदुर्गाजयति॥ त्वंमयिकरोषिकरुणांजानेत्रिपुरेशितदनुमानेन। मन्मुखतोह्य
स्खलिताजगदंबेतिप्रवर्ततेवाणी॥१॥ टीका॥ हेत्रिपुरेशित्वंमयिकरोषिकरुणांतत्क
रुण्यंअहंअनुमानेनैवजाने हियस्मादनावृतामेवाणीजगदंबेतिप्रवर्तते॥१॥ चं
चरीकवृतपुंडरीकवद्बर्बरीकमुखमंबिकेतव। चारुयोर्चतिचनोतिमर्मरीकोप्यसौ
जयतिपर्परीकवत्।२॥पर्फरीकसममंघ्रिमंबतेयोनमःस्मरतिचर्करीतिच। ईंदि
रावसतितस्यमंदिरेझर्झरीकमपिनिजरंभवेत्।३॥शार्शरीकःसर्सर्पीतिमा
तर्मृत्युसरीसृपः। शीघ्रमायाहिमांपाहिजीवदानंचदेहिमे।४॥दर्पकस्यशरैः
सर्पैःसंपृक्तायाधियांमम। वर्वर्तीतिनतेनामकर्करीकांबुवच्छिवे॥५॥स्तोतुंत्वं
च्चरणंनालंस्नविस्तरमहेश्वरः। तत्रेहंशरणंयामिदुर्गेन्यत्करवाणिकिम्।
॥६॥ टी०॥हेअंबिकेतवबर्बरीकमुखंकुटिलकेशवदनंचंचरीकवृतपुं
डरीकवत्भ्रमरवृतमुखकमलवच्चारुसुंदरंयोर्चतिपूजयतिअसौमर्मरीकोपिनि
र्धनोपिपर्परीकवत्सूर्यवज्जयति। पुंडरीकंमुखस्योपमानं। कुटिलकेशानांचंचरीकैः
साम्यं। चंचरीकबर्बरीकादयःसिद्धांतकौमुद्यांप्रसिद्धाः॥२॥हेअंबपर्फरीकसमंकि दुर्गा
सलयकोमलंतेंऽघ्रिंयःस्मरतिनमश्चर्करीतिपुनःपुननमस्करोतितस्यमंदिरेगृहेईंदि
रालक्ष्मीर्वसतितस्यझर्झरीकमपिशरीरमपिनिजरंजरारहितंभवति।३॥हेमातः
मृत्युलक्षणःसरीसृपःसर्पःसर्सर्पीतिनित्यमनुधावतीत्यर्थः। अतस्त्वंशीघ्रमागच्छे
त्यादि। जीवयतिचेतयतिजीवश्चैतन्यंतद्दानंब्रह्मसाक्षात्कारमित्यर्थः। किंविधःशार्श
रीकःघातुकः।४॥दर्पकस्यानंगस्यसर्पतुल्यैःशरैःममसंपृक्तायानित्यसंबंधयुक्ता
योधियांतेनाम्नवर्वर्तीति। कर्करीकांबुवत्कर्करीकागलंतिकातत्रजलंयथा। श
रसंपर्कोगलनेहेतुः॥५॥महेश्वरःसाक्षाच्छिवोपियत्त्वच्चरणंस्तोतुंनालंनस
मर्थः। तत्रकोहंवराकइत्यर्थः। अतस्त्वच्चरणंशरणंयामिशरणमितिगृणामि।
हेदुर्गेअन्यत्किंकरवाणिकामपिसेवांकर्तुंनसमर्थइत्यर्थः॥६॥अतोऽनिमित्त
बंधुत्वमालिन्यात्वपादवनीयोऽहमितिभावः सेवामपेक्ष्य दातानोऽदातेसाधु
के ः ६ इतिमहेश्वरेणरचितासटीकदुर्गास्तुतिः [illegible]